दिनाङ्क :- 23.08.2024

प्रातः - 06:55

## भारतं पोलैण्ड्

भारतं पोलैण्ड् देशौ स्वीयसम्बन्धान् रणनैतिक सहभगित्वेन परिवर्तयितुं निश्चयं कृतवन्तौ। वारसानगरे स्वस्य पोलिशसमकक्षेन डोनाल्ड टस्क् इत्यनेन सह प्रतिनिधिमण्डलस्तरीय वार्तायां प्रधानमन्त्री नरेन्द्रमोदि इदम् उक्तवान्। प्रधानमन्त्रिणा विश्वासः अपि प्रकटितः यत् पोलैण्डस्य समर्थनं भारत-यूरोपीयसङ्घयोः मध्ये च सम्बन्धं सुदृढं करिष्यति। श्रीमोदी अवदत् यत् उभौ पक्षौ सहमतौ यत् संयुक्तराष्ट्रसङ्घे अन्येषु अन्तर्राष्ट्रीयसंस्थासु सुधारः वैश्विक समाह्वानान् सम्मुखी कर्तुं समयस्य आवश्यकता वर्तते। अस्मिन् अवसरे प्रवदन् प्रधानमन्त्री अवदत् यत्, भारतं स्वमित्रदेशैः सह युक्रेन-पश्चिम-एशिया-देशयोः शान्ति-स्थिरतायै शीघ्रं च पुनर्स्थापनायै कूटनीति-संवादयोः माध्यमेन यथा समभवं समर्थनं दातुं सज्जः अस्ति।उभौ नेतारौ द्विपक्षीयसम्बन्धानां समीक्षां कृतवन्तौ अपि च अनेकविषयेषु विचाराणां आदानप्रदानं कृतवन्तौ। द्वयोः पक्षयोः उपवेशने अन्येषां परस्पररुचिमार्गाणां अन्वेषणस्य अवसरः प्राप्तः । पोलिशप्रधानमन्त्री डोनाल्ड टस्कः अवदत् यत्, भौगोलिकभेदाः, भिन्नाः परम्पराः च सन्ति तथापि उभौ पक्षौ परस्परं सम्यक् अवगच्छतः। वार्ताहरान् संबोधयन् विदेशमन्त्रालयस्य सचिवः तनमयलालः अवदत् यत्, प्रधानमन्त्रिणः पोलैण्ड्-देशस्य यात्रा ऐतिहासिकः अतीव सफला च आसीत्।

## यूक्रेन-भारतयोः

स्वकीय द्वयोः राष्ट्रयोः यात्रायाः द्वितीये अंतिमे च चरणे, प्रधानमंत्री नरेंद्र मोदी यूक्रेनस्य राष्ट्रपतेः वलोदिमिर ज़ेलेंस्की इत्यस्य निमंत्रणे अद्य कीव नगरं संप्राप्ष्यति।

द्विनवति-उत्तर- एकोनविंशति-तमे वर्षे यूक्रेन-भारतयोः मध्ये राजनयिकसंबंधाः स्थापिताः आसन्, राजनयिकसंबंधानां स्थापनानन्तरं प्रथमवारं भारतीयप्रधानमंत्रिणः यूक्रेनस्य एषा यात्रा अस्ति। कीव नगरे प्रधानमंत्री मोदी तत्रत्येन राष्ट्रपतिना वलोदिमिर ज़ेलेंस्की इत्यनेन सह व्यापार-निवेश-शिक्षा- सांस्कृतिक-संबंधानां विषये चर्चा करिष्यति।

## नायडु-उड्डयन मार्गदर्शिकाः

केन्द्रीय नागरिक उड्डयनमन्त्री राममोहन नायडु आरसीएस-उड़ान इत्यस्य अन्तर्गतं समुद्रीविमानसञ्चालनस्य मार्गदर्शिकाः प्रसारिताः सन्ति। दिग्निर्देशे समुद्रीविमानसञ्चालनस्य संरक्षा सुरक्षयोः च प्राथमिकताम् ददाति तथा च प्रत्येकस्य हितधारकस्य दायित्वं स्पष्टतया रेखांकितं करोति, मार्गदर्शिका सम्पूर्णे राष्ट्रे समुद्रीविमानसञ्चालनस्य संचालनात् आरभ्य नियामकसंस्थापर्यन्तं निर्बाध-कुशलं च प्रसारणं सुनिश्चितं कुर्वन्ति। नवदिल्ल्यां अस्मिन् अवसरे प्रवदन् नायडुमहोदयः अवदत् यत् मार्गदर्शिकायाः उद्देश्यं देशस्य दूरस्थक्षेत्राणि संयोजयितुं सर्वेषां कृते सुलभ-यात्रां कर्तुं च अस्ति।

## अन्तरिक्षदिवसः

अद्य देशे प्रथमः राष्ट्रियः अन्तरिक्षदिवसः आचर्यते। अस्मिन् वर्षे अस्य महोत्सवस्य विषयः अस्ति चन्द्रस्पर्शनेन जीवनस्पर्शनम् - भारतस्य अन्तरिक्षगाथा इति । राष्ट्रपति द्रौपदी मुर्मू नवदिल्लीस्थे भारतमण्डपमे आयोजितस्य मुख्यकार्यक्रमस्य उद्घाटनं करिष्यति। अन्तरिक्षराज्यमन्त्री डॉ. जितेन्द्रसिंहः अवदत् यत् गतवर्षे अस्मिन् दिने चन्द्रयान-तृतीयस्य प्रक्षेपण-समये विक्रम-लैण्डर इत्यस्य चन्द्रमसि सुरक्षितं सरलं च अवरोहणं जातम्। तेनोदीरितं यत् भारतं चन्द्रमसि अवतीर्य चतुर्थः देशः सञ्जातः, चन्द्रमसः दक्षिणध्रुव-प्रदेशस्य समीपे अवतीर्य प्रथमः देशः च अभवत् ।

**उपराष्ट्रपति**

**उपराष्ट्रपति जगदीप धनखड़: अद्य गुजरातस्य अहमदाबाद गांधीनगरयोः यात्रां विधास्यति। उपराष्ट्रपतिः स्वस्य एकदिवसीयस्य यात्रावधौ गांधीनगरस्य राष्ट्रियन्यालयिकविज्ञानविश्वविद्यालये छात्रान् संकायसदस्यान् च सम्बोधयिष्यति। पश्चात् धनखड़महोदयः अहमदाबादनगरस्य गुजरातविश्वविद्यालये धर्मधम्म-अन्तर्राष्ट्रीयसम्मेलने अपि भागं गृह्णीयात्। गुजरात यात्रायाः अवसरे राज्यपालः आचार्यदेवव्रतः मुख्यमन्त्री उपेन्द्रपटेलः च उपस्थितौ भविष्यतः ।**

**नीरज चोपड़ा**

**गतरात्रौ स्विट्ज़र्लैण्ड्देशे चतुर्विंशत्यधिक द्विसहस्र तम वर्षस्य लुसाने डायमण्ड् लीग् प्रतियोगितायां पुरुषाणां भालाप्रक्षेपणस्पर्धायां पेरिस ओलम्पिक प्रतिस्पर्धायां रजतपदकविजेता नीरज चोपड़ा द्वितीयस्थानं प्राप्तवान्।**

**।।इति वार्ता:।।**